॥ समणस्स भगवओ महावीरस्स ॥

आगमोद्धारक-ग्रन्थमाला-ग्रन्थाङ्कः ३

ध्यानस्थस्वर्गत-आगमोद्धारक-श्रीमदानन्दसागरसूरीश्वरेभ्यो नमः

# ॥ श्रीवस्तुसार-रत्नपाल-चरित्रे ॥

: प्रकाशिका :

आसपुरवास्तव्य-प्राग्वाटवंशीय-श्रीप्रेमचन्द्रस्मणार्थं तल्लघुभ्राता-मोतीचन्द्रकृत-द्रव्यसहाय्येन

कर्पटवाणिज्या श्रीमीठाभाई-कल्याणचन्द्र-जैन श्वे० संस्था।

श्रीवीर सं. २४८२ | आगमोद्धारक सं. ७ | विक्रमीय० २०१२

प्रतिः ५०० | मूल्यं-पठनपाठनं | क्राईष्ट० १९५६

मुद्रक : महेता अमरचंद बेचरदास, श्रीबहादूरसिंहजी प्रीं. प्रेस : पालीताणा (सौराष्ट्र)

# समर्पणम्

## पूज्यपादगणिवर्य-श्रीलब्धिसागरमहोदयानाम्

विद्यमानं सर्वं संसारसुखं तिरस्कृत्य भवान् युवावस्थायां निष्क्रान्तः। सर्वमपि कुटुम्बिजनं असारात् संसाराद् उद्धृत्वा संयममार्गे प्लावितं च। अस्मिन् समयेऽपि भवत् कुटुम्बिनः चतुर्विंशति संयमिनः संयमानन्दमनुभवन्ति।

भवतामुपदेशप्रेरणाभ्यां जीर्णोद्धारादिनि अनेकशुभकार्याणि संजातानि भवन्ति च। अतो भवतां गुणाकृष्टोऽहं इमे लघू चरित्रे उपदि करोमि.

त्रैलोक्यसागरः

# प्रकाशकीय वक्तव्य

आ संस्थाने आगमोद्धारक ग्रन्थमालाना आ त्रीजा ग्रन्थने बाहर पाड़तां अत्यन्त आनन्द थाय छे के आ एकज वर्षमां संस्थाये त्रण ग्रन्थरत्नो बाहर पाड्या छे।

आमां पू. श्रीमलयसागरजी महाराज पासेथी सांभलेली बे कथाओने संस्कृत पद्यमां मुनिराज श्रीत्रैलोक्यसागरजी म. रचेल छे। अने तेनी शुद्धि पू. श्रीसूर्योदयसागरजी म. तथा पू. श्रीप्रबोधसागरजी म. करेल छे. तेने प्रकाशन करवानो तमाम खर्च आसपुर निवासी श्रीप्रेमचन्दभाईना स्मर्णार्थे तेमना लघुभ्राता मोतीचन्दभाईए आपेल छे। तथा चरित्रोनां प्रुफो सुधारवानुं कार्य पू० श्रीकञ्चनविजयजी म. सा. तथा श्रीप्रमोद-सागरजी म. करेल छे. द्रव्य सहायक तथा पू. मुनिराजोनो अमो आभार मानीए छीए. प्रेस दोष के दृष्टि दोषथी कोई अशुद्धि रही होय तो सुधारी वांचवा अमारी भलामण छे.

प्रकाशक

# श्रीयुत् प्रेमचन्दजी का संक्षिप्त जीवन चरित्र

आपका जन्म डूंगरपुर (राजस्थान) जिलेके अंदर आसपुर नामक ग्राममें वीशा–पौरवाल ज्ञातीय श्रीउदयचन्दजी सिमलावत की सुपत्नी कुरीबाई की कुक्षीसे सं. १९६४ मार्गशिर्ष कृष्णा ८ को हुवा था। आप बचपन से ही सुसंस्कारी थे। श्रीउदयचन्दजी के लघुभ्राता श्रीपुनमचन्दजी के कोई संतान नहीं होने से आपको पुत्र तरिके स्वीकार किये थे। आपके लघुभ्राता मोतीचन्द नामक है, व एक बहीन भी थी। आप व्यापार कार्य में अधिक कुशल थे। आप न्यायसंपन्न वैभवको ही चाहनेवाले थे। आपने अपने जीवनमे किसीके साथ दगा फरेब नहीं किया, कालेबाजारका इतना जोरशोर था, फिर भी आप उसे जहरीला काला साँप समजकर बाल बाल बचे थे।

आपकी धार्मिक भावना अत्यन्त सराहनीय थी, जब कभी कोईभी धार्मिक कार्य उपस्थित होता तो आप अग्रेसर होकर उस कार्यको तन, मन और धन की सहायता देकर पार लगा देते थे।

सं. २००७ में आप सहकुटुम्ब शत्रुंजय व गिरनारजी की यात्रा को गये थे, तब गिरनारजी के जीर्णोद्धार के कार्यको देखकर आपने अभिग्रह किया कि जब तक मैं यहां के जीर्णोद्धार में रु. १००००) न दे सकुं तब तक हर पूर्णिमाको घृत नहीं खाऊंगा।

वैसे ही स्थानीय संघ के एक कार्य बाबत आपने अभिग्रह किया था कि जब तक वह कार्य न हो जायगा तब तक लग्न–प्रसंग के जीमन में मीठा पकवान्न नहीं खाउगा।

॥ ३ ॥

सं. २०११ में यहां पूज्य श्रीत्रैलोक्यसागरजी म० व श्रीरुपसागरजी म० का चातुर्मास था, तब उपधानतप संबन्धि बात निकलने पर आपने आधा खर्च देना स्विकार किया था, और आधा खर्च श्रीसंघने देना स्विकार किया, और उपधान-तप बडे आनन्द से पूर्ण हुवा, जिसमें १३ भाईयों व ४८ बहिनोने लाभ लियाया था।

सं. २०१२ में यहां पार्श्वचंद्र गच्छीय मुनि विकासचंद्रजी चातुर्मास रहे थे, और चातुर्मास बाद फाल्गुन शु. १ को महाराज यहां से तीन मील दूरीपर गोठड़ा नामक ग्रामके निकट एक गुफामे ध्यान लगाने जा रहे थे, सो आप अपने लघुभ्राता एवं और भी दो चार जने साथ वहां गये हुवे थे, वहां पहुचने पर आप हाजत रफा करने को गये, और हाथ शुद्धि के लिये एक बाव में उतरे वहां चक्कर आनेसे अन्दर गिर पड़े और इस असार संसार को छोड़कर स्वर्गको सिधाये।

आपके पीछे दो पुत्रीयें व एक लघुपुत्र ११ वर्षयि छोड़ गये है। शासनदेव से प्रार्थना है कि संघमे इनकी जो कमी पडी है उसे व उनके किये हुवे अभिग्रहोंको पूर्ण करने की शक्ति आपके लघुभ्राता व आपके पुत्रको प्रदान करें। आपकी आत्माको शान्ति प्रदान हो ऐसी भी शासनदेवसे विनन्ति है।

श्रीचतुर्विध संघ सेवक

**वृद्धिचंद भीमचंदजी सेमलावत : आसपुर**

卐

॥४॥

समणस्स भगवओ महावीरस्स

अनन्तलब्धिनिधानाय श्रीगौतमस्वामिने नमः

आगमोद्धारक श्रीमदानन्दसागरसूरीश्वरेभ्यो नमः

# ॥ श्रीवस्तुसारचरित्रम् ॥

ज्ञातान्वये महादीपं, तीर्थनाथमपश्चिमम्। भव्यानां हितबोधाय, सुष्ठुधर्मोपदेशकम् ॥ १ ॥ बाल्येऽप्यमरनाथस्य, संदेहोच्छेदकारिणम्। धीरतायाः महागारं, संगमे करूणाकरम् ॥ २ ॥ श्रीगौतमादिविप्राणां सद्वेदार्थप्रकाशकम्। अपूर्वज्ञानदातारं, नौमि तं ज्ञातनन्दनम् ॥ ३ ॥ (त्रिभिर्विशेषकम्) गौतमादिगणाधीशान्, एकादश मुनीश्वरान्। सार्वान् गणधरांस्तांश्च, वन्देहं शुभभावतः ॥ ४ ॥ स्तौमि स्वपरशास्त्रज्ञं, आगमद्युतिधारकम्। आगमज्ञानदातारं, सूरिमानन्दसागरम् ॥ ५ ॥ पंचाचारेऽनिशं रक्तं, दान्तं सद्भावधारकम्। सदानन्देन वक्तारं, वन्दे क्षमाब्धिपाठकम् ॥ ६ ॥ नत्वा देवगुरुन् सर्वान्, वन्दित्वा जिनभारतीम्। चरित्रं वस्तुसारस्य, लिखामि देवभाषया, ॥ ७ ॥ शान्तिपुराभिधे ग्रामे, जिनप्रासादमण्डिते। शत्रुमर्दनराजाऽस्ति, स्तोकभूमिप्रशासकः ॥ ८ ॥ तस्य पुरोहितो विश्वभूतिर्नाम महाबुधः। सर्वकार्येषु दक्षो यः, राजनीतिविचक्षणः ॥ ९ ॥ निर्मला तस्य भार्याऽभूत्, शीलालङ्कारशोभिता। वस्तुसारस्तयोः पुत्रः, प्राणप्रियः सुलक्षणः ॥ १० ॥ पाठयति पिता पुत्रं, सदा शास्त्राण्यनेकशः। ऋते पितुश्च को दाता, बालेभ्यो हितशिक्षणम् ॥ ११ ॥ एवं तु दशमे वर्षे, दुर्भाग्याशनिपाततः। विश्वभूतिस्तदाधारः, कथाशेषत्वमासदत् ॥ १२ ॥ वस्तुसारं सुशास्त्राणि, पाठयेत् को विना पितुः। एवं गतेषु कालेषु, षोडशवर्षकोऽभवत् ॥१३॥ इतः शान्तिपुरासन्ने, गते क्रोशे च पंचषे।

इन्द्रपुरसमानं वै, देवपुरं महापुरम् ॥ १४ ॥ तत्र देवयशो राजा, पुरोहितश्च सोमिलः । सोमिला तस्य भार्यास्ति, सीललावण्य-
शोभिता ॥ १५ ॥ सुकोमलाऽभिधा कन्या, रुपेण रतिसन्निभा । नम्रतादिगुणोपेता, तयोर्जाता सुलक्षणा ॥ १६ ॥ संप्राप्तयौवनां
ताञ्च, दृष्ट्वेत्यचिन्तयद्विजः । एतद्योग्यो वरः कोऽपि, दर्शनीयो मयाऽधुना ॥ १७ ॥ सन्ततिर्मे न काप्यस्ति, विना पुत्र्यामया खलु ।
तस्मात् सुगुणसंयुक्तः, जामाता सुकुलोद्भवः ॥ १८ ॥ मदालये वसेद्यो हि, मुक्त्वा पित्रादिकं सदा, तस्मै कन्या मया देया । कस्मै
चिन्नान्यसूनवे ॥ १९ ॥ (युग्मं) एवं विधं वरं सोऽथ, मृगयामास सर्वतः । परं प्राप्नोति न क्वाऽपि, चिन्ता चिते च वर्धते
॥ २० ॥ भाषायां–"सुखे न सुवे धननो धणी, सुखे न सुवे जेने चिन्ता घणी । सुखे न सुवे दिकरीनो बाप, सुखे न सुवे
जेना घरमां साप ॥ २१ ॥" इतः कोऽपि मनुष्योऽथ, समेत्योवाच सोमिलम् । आसीच्छान्तिपुरे स्वामिन् !, विश्वभूतिपुरोहितः
॥ २२ ॥ वस्तुसारः सुतस्तस्य, षोडशवार्षिकः सुधीः । जनीसहित एवास्ति, कन्यायोग्यो मयेक्षितः ॥ २३ ॥ कथंचिद्बोधयित्वा
तन्, मातरं सादरं भवान् । ददातु वस्तुसाराय, कन्यकां स्नेहलामपि ॥ २४ ॥ पुरोधसा तदर्थञ्च, प्रेषिता वाग्मिनो लघु । गत्वा
शान्तिपुरे तेऽपि, प्रोचुः तन्मातरं मुदा ॥ २५ ॥ देवपुरे प्रसिद्धो यः, सोमिलोऽस्ति पुरोहितः । द्विजोत्तमो नरेशस्य, मान्यो गुण-
विभूषणः ॥ २६ ॥ तस्यैका सुभगा पुत्री, लावण्यरुपशोभिता । युवावस्थाञ्च संप्राप्ता, लग्नयोग्याऽधुनाऽस्ति वै ॥ २७॥ श्रुत्वा योग्यं
भवत्पुत्रं, वस्तुसारं गुणान्वितम् । प्रेषिताः सोमिलेनात्र, समेता वरलिप्सुना ॥२८॥ एकैव तस्य कन्यास्ति, प्राणेभ्योऽत्यन्तवल्लभा ।
जामाता मद्गृहे तिष्ठेदित्येवेच्छति सोमिलः ॥ २९ ॥ निर्मलोवाच भो विप्राः !, एकपुत्रो ममाऽपि च । कथङ्कारं गृहे तस्य,
तत्पुत्रं प्रददाम्यहम् ॥ ३० ॥ विप्राः प्रोचुरये सुभ्रु, तत्र स्थितिस्तु निर्बला । कथं विवाहसंबन्धं, करिष्यसि द्विजालये ॥ ३१ ॥
भूषणानि च वस्त्राणि, ब्रह्मभोजनकान्यपि । सर्वाणि लग्नकार्याणि, विना द्रव्यं कथं भवेत् ॥ ३२ ॥ अन्यापि वस्तुसारस्य, प्राध्य-
यनविधायिनी । पाठकादिसुसामग्री, नास्ति सुखपुरःसरम् ॥ ३३ ॥ द्रव्याभावेन सुष्ठुत्व–मस्मिन् कार्ये विचारय । धनं कन्या च
विज्ञानं, सर्वं तत्र भविष्यति ॥ ३४ ॥ एवं युक्तिप्रयुक्तिभ्यां, मातुरादाय सम्मतिम् । गत्वोपवस्तुसारं ते, तन्मतं जगदुः तदा ॥३५॥

अज्ञानाद्वस्तुसारेण, स्वीकृतं तद्वचो रहः । 'तृष्णापाशैरहो बद्धा, जन्तवः किं न कुर्वते' ॥३६॥ भाषायां–" चार कोशकी आवण जावण, बार कोशकी घी घलावण । तीसकोस माथाको मोड, घरजमाइ गंडककी ठोड ॥ ३७ ॥ " वस्तुसारेण सार्धं ते, आगतास्सोमिलान्तिके । दृष्वा जामातरं योग्यं, हृदये हर्षभागभूत् ॥ ३८ ॥ कुंकुमतिलकं कृत्वा, लग्नं च समहोत्सवम् । मन्यते स्वं कृतार्थं च, सोमिलः पुलकाञ्चितः ॥ ३९ ॥ अध्ययनाय तेनासौ, ग्रामान्तरं च प्रेषितः । उषित्वा तत्र सारोऽप्य-भ्यासं करोति संमुदा ॥४०॥ श्वशुरस्य गृहे याति, कदायाति निजे गृहे । एवमनेक वर्षाणि, व्यतितानि सुखेन वै ॥ ४१ ॥ इतश्च वस्तुसारस्य, प्रिया गर्भं बभार च । परिवर्तित चेष्टा सा, गर्भं च परिरक्षति ॥ ४२ ॥ इतः संपूर्ण काले सा, पुत्रं प्रासूत कोमला । जन्मोत्सवः कृतस्तस्य, सोमिलेन महामहैः ॥ ४३ ॥ शुभे दिने तदा तस्य, कृतं नाम सुधीरिति । सुलक्षणेन युक्तः स, इन्दुकलेव वर्धते ॥ ४४ ॥ यदा तु वस्तुसारोऽगात्, नुत्यै श्रीमातृसन्निधौ । तदा च वक्ति तं माता, पौत्रं च मम दर्शय ॥ ४५ अहोऽहं मन्दभाग्यास्मि, यन्न-दृष्टं स्नुषामुखम् । द्रष्टुं पौत्रं न शक्नोमि, 'चित्रा गतिर्हि कर्मणाम्' ॥ ४६ ॥ पौत्रेक्षणाय हे पुत्र !, ममेच्छा वर्ततेऽधुना । वस्तु-सारो जगौ मातः !, दर्शयिष्यामि ते सुतम् ॥ ४७ ॥ इत्याश्वास्य जनीं सारः, समागात् श्वशुरौकासि । श्वश्रूं च कथयामास, जननी हृदयाशयम् ॥ ४८ ॥ कोपं कृत्वा तदा श्वश्रूः, वक्ति जातमातरं प्रति । रे मूढ ! किं वदत्येवम्, पुत्रकाविमकौ मम ॥ ४९ ॥ गमिष्यतो न मे गेहाद्, अन्यगृहे कदाचन । द्रष्टुमिच्छति ते माता, तर्ह्यागच्छतु सादरम् ॥ ५० ॥ अचिन्ति वस्तुसारेण, 'स्त्रीषु प्रज्ञा भवेन्नहि' । श्वशुरं कथयिष्यामि, 'बुद्धिशाली नरो यतः' ॥ ५१ ॥ एकदा सोमिलस्याग्रे, वस्तुसारोऽवदत् पुनः । मातुर्मे वर्तते कांक्षा, द्रष्टुं पौत्राननं खलु ॥ ५२ ॥ मातुर्मनः समाध्यं, तौ नीत्वा च निजे गृहे । पश्चाद् द्वित्रि दिनान्नुन-मागन्तास्मि तवा-न्तिके ॥ ५३ ॥ श्रुत्वैवं वस्तुवाचं हि, तदा वह्निकणोपमाम् । पुरोहितोऽब्रवीदेवं, क्रुधा विवेप वर्ष्मकः ॥ ५४ ॥ अरे मूढ ! न जा-नासि, जामाता त्वं गृहे मम । एषा पुत्री सुतश्चैषो, दोगुन्दकसहोदरौ ॥ ५५ ॥ नोगमिष्यत एतौ तु, मातुस्ते सन्निधौ क्वचित् । गत्वा शान्तिपुरे शीघ्र-मानय जननीं तव ॥ ५६ ॥ श्रुत्वेदं वस्तुसारोऽथ, विलक्षोऽचिन्तयत्तदा । अहोऽसमञ्जसं जातं, गृहे जामा-

तृता खलु ॥ ५७ ॥ यस्याः पिता वदत्येवं, प्रत्यक्षमसञ्जसम् । कथं ? सुकोमला सा तु, मया सार्धं समेष्यति ॥५८॥ किं करोमि क्व गच्छामि, कस्याग्रे पूत्करोम्यहम् । गृहे जामातरं धिक्धिक्, धिक् तस्य जीवितं मम ॥ ५९ ॥ कियत्यपि गते काले, कस्मै प्रयोजनाय च । वस्तुसारो गतो ग्रामे, श्वशुरस्य निदेशतः ॥ ६० ॥ प्रत्यागच्छति सः सारः, कार्यं कृत्वा पुरं प्रति । शान्तिपुरे वसन् कोऽपि, मार्गे च मिलितस्तदा ॥ ६१ ॥ पृच्छति स्म तकं सारः, जनन्याः कुशलं मम । प्रत्युवाच तदा सोऽथ, ते माता मृत्युसन्मुखा ॥ ६२ ॥ ततः शान्तिपुरे शीघ्रं, गच्छ त्वं मातुरन्तिके । स्नेहार्द्रचित्तः श्रुत्वैवमागात् शीघ्रं जनीं प्रति ॥ ६३ ॥ दुःखान्वितां जनीं दृष्ट्वा, वस्तुसारोऽतिदुःखितः । पुत्रं दृष्ट्वा प्रसूः प्राह, जीवितमन्त्यमेव मे ॥ ६४ ॥ न दृष्टं पौत्रवक्त्रं तु, न दृष्टं च वधूमुखम् । एवं मातुर्गिरिं श्रुत्वा, वस्तुसारोऽरुदीद च ॥ ६५ ॥ मया मूढेन नोऽकारि, जनीकार्यं हि जन्मनि । हा किं मे पुरुषत्वेन, यस्यैतदपि दुःशकम् ॥ ६६ ॥ उक्तं च–" उढो गर्भः प्रसवसमये सोढमत्युग्रशूलं, पथ्याहारैः स्नपनविधिभिः स्तन्य-पानप्रयत्नैः । विष्ठामुत्रप्रभृतिमलिनैः कष्टमासाद्य सद्यस्त्रातः पुत्रः कथमपि यया स्तूयतां सैव माता ॥ ६७ ॥" एकं साप्तपदीनं च, सारो गदति हे सखे ! । त्वं श्वशुरगृहे याहि, प्रत्यानय सुतादिकम् ॥ ६८ ॥ मित्रं वदति हे सार !, तत्र याहि त्वमेव हि । तत्राऽहं किं करिष्यामि, विचित्रः श्वशुरः श्रुतः ॥ ६९ ॥ परिचर्यां करिष्यामि, तस्माद्गच्छ त्वमेव हि । लात्वा पुत्रादिकं शीघ्र-मागच्छ मातुरान्तिके ॥ ७० ॥ पुत्रादि ग्रहणार्थं च, वस्तुसारस्तदा गतः । विशन्तञ्च गृहं सारं, बभाषे सोमिलो द्विजः ॥ ७१ ॥ स्तोक-कार्ये विलम्बस्ते, मूढ ! कुतो बभूव रे । जगाद वस्तुसारोऽथ, जनीं मे व्याधिपीडिता ॥ ७२ ॥ अन्त्यावस्था तदीयैव, कुटुम्बं द्रष्टु-मिच्छति । तस्मात् पुत्रादिकं नीत्वा, तत्र गन्तास्मि सत्वरम् ॥ ७३ ॥ श्वशुरोऽथ जगादैवं, विस्मृतं किं वचो मम । ममैतौ तु सुतापुत्रौ, नेतुं शक्नोषि नो क्वचित् ॥ ७४ ॥ उवाच वस्तुसारोऽथ, किं वदसि द्विजोत्तम ! । ईदृशे समये त्वीदृक्, प्रजल्पन् किं न लज्जसे ॥ ७५ ॥ स्त्रीपुत्रौ च ममैव स्तः, नाधिकारस्तयोस्तव । सोमिलः प्राह द्वारिस्थं, जल्पकं कुटतु त्वमुम् ॥ ७६ ॥ करं धृत्वा च भृत्येन, पातितो भूतले लघु । यष्टि मुष्टि प्रहारेण, प्रहतोऽसौ सुनिर्दयम् ॥ ७७ ॥ काकनाशं प्रणश्यन् हि, समा-

गतो निजे गृहे। गृहद्वारं विशन् दुःखी, पपात भूतले तदा ॥ ७८ ॥ मूर्च्छितो गतशुद्धिश्च, वक्तुं किं नापि प्राभवत्। इतः सोमिलगेहे च, यज्जातं कथयामि तत् ॥ ७९ ॥ प्रदोष समये तत्र, धात्रीयुक्ता सुकोमला। पुत्रं च क्रीडयामास, सानन्दा हि गवाक्षके ॥ ८० ॥ धात्री सुकोमलां प्राह, नवीनं किं श्रुतस्त्वया। मया तु न श्रुतं किञ्चित्, यज्जातं तद्वद त्वकम् ॥ ८१ ॥ धात्री प्रोवाच हे पुत्रि !, समाकर्णय तद्यथा। पत्युस्ते जननीदानी-मन्त्यावस्था सुदुःखिता ॥ ८२ ॥ दिदृक्षिकाधुना तस्याः, स्नुषा पौत्रा-ननस्य च। ततो वध्वादिकं शीघ्रं, नेतुमागात् पतिस्तव ॥ ८३ ॥ पित्रा तिरस्कृतः सोऽथ, ताड्यमानो नियोगिना। धावमानस्ततः शीघ्रं, कष्टेनागात् निजे गृहे ॥ ८४ ॥ वर्तनेन पितुः पुत्रि !, दूयतेऽतिमनो मम। त्वत्तो गुप्तमिदं त्वेतद्, परं दुःखप्रदं ननु ॥ ८५ ॥ अहो वदसि किं मातः, पित्रा मे बुद्धिशालिना। दुश्चेष्टितं कृतं किं नु, नो जाने किं भविष्यति ॥ ८६ ॥ मातरश्चैव मां तत्र, सपुत्रां नय मंक्षु वै। उत्कण्ठाऽतीव मे नन्तुं, श्वश्रूचरणपंकजौ ॥ ८७ ॥ विलम्बोऽथातिदुःसह्यो, क्षणो वर्षसमो मम। कुरूपायं यथायोग्यं, येन गच्छामि लीलया ॥ ८८ ॥ धात्री जगाद हे पुत्रि !, कथं रात्रौ नयाम्यहम्। पथ्यस्मिन् तिमिराक्रान्ते, यावो यानं विना कथम् ॥ ८९ ॥ देहे नो विद्यते शक्तिः, गन्तुं पादेन तत्र हि। राजगृहे विना यानं, त्वं तु ना यात् कदाचन ॥ ९० ॥ गृहाद्बहिः पृथिव्यां तु, पदं मुक्तं कदा नहि। कथं यास्यसि मृद्वङ्गि !, सपुत्रा पथि दुर्गमे ॥ ९१ ॥ साहैतत्तु गृहं नूनं, कारागारसमं मम। एतदुपवनं चारू, श्मशानमिव भासते ॥९२॥ सुखस्पर्शा च मे शय्या, भासते कण्टकाऽऽकुला। मृदु प्रावरणं तत्तु, वह्निकल्पं प्रभासते ॥ ९३ ॥ धात्री जगाद् हे पुत्री !, शृणु तावदुपायकम्। रात्रिमध्ये गमिष्यावो, द्वारेण पश्चिमेन तु ॥ ९४ ॥ प्रच्छन्नं पादचारिण्यौ, द्वारपालावितर्किते। निर्णीयेति तदा ते तु, यापयामासतुः क्षणम् ॥ ९५ ॥ ततो बालं समारोप्य, धात्रीस्कन्धे सुकोमला। यावत् पुरोद्विनिर्याति, तावत् तस्या मृदुक्रमात् ॥ ९६ ॥ कण्टककर्करादिभ्यः, शोणितं निर्गतं बहु। दुखं विस्मृत्य गच्छन्त्यौ, विलंबेन विनाग्रतः ॥ ९७ ॥ मध्यमार्गे च संप्राप्ते, स्थिता तत्र सुकोमला। निःश्वसन्ति जगादेवं, दीनास्या मातरं प्रति ॥ ९८ ॥ (त्रिभिर्विशेषकम्) परिश्रमेण मे देहात्, शक्तिर्या सा विनिर्गता। ततोऽहं पादमप्यग्रे, गन्तुं शक्नोमि ना-

धुना ॥ ९९ ॥ धात्र्यवदत् सुतामेवं, पुराहि कथितं मया । एकाकिनि वनेऽत्राहं, तमस्विन्यां करोमि किम् ॥ १०० ॥ यावत्तयो-र्मिथो वार्ता, तावत् पुण्योदयेन हि । प्रयान्तस्तु तदा केचित्, शाकटिकाः समागता ॥ १०१ ॥ शाकटिकाङ्गगौ धात्री, यूयं कुत्र गमिष्यथ । प्रत्युत्तरं ददत्येवं, व्रजामः शान्तिपत्तनम् ॥ १०२ ॥ धात्र्यवदच्च हे भ्रातः, विश्वभूतेरियं स्नुषा । गन्त्रीमध्ये पथि श्रान्ता, वराकी नीयते त्वया ॥ १०३ ॥ शाकटिको वदत्येवं, गन्त्र्यामारोहतु स्वयं । आरुह्य शकटे द्वे तु, शान्तिपुरं प्रतीयतुः ॥ १०४ ॥ ग्रामाद्बहि समुत्तिर्य, ग्रहित्वा तं शिशुं तदा । विश्वभूतेर्गृहं पृष्ट्वा, गच्छतस्ते शनैश्शनैः ॥ १०५ ॥ श्वश्रूं द्रष्टुं गृहे याति, तावत् प्राप्तां यमालयम् । श्मशाने नीयमानां तां, पश्यति सोद्यमैर्जनैः ॥ १०६ ॥ मूर्च्छिता प्राप्तसंज्ञा सा, वक्षस्तदैव कुट्टति । शबोपरि सुतं मुक्त्वा, क्रन्दते च महास्वरैः ॥१०७॥ लोका गदन्ति तामार्ता, मृता श्वश्रू तवैव हि । कदा को न मृतो जीवेत्, ततस्तापं त्यज वृथा ॥ १०८ ॥ सद्यो धवं भज त्वं तु, मुमूर्षुरस्ति सोऽधुना । श्रुत्वैवं वस्तुसारस्य, सन्निधौ त्वरितं गता ॥ १०९ ॥ समेत्य मूर्च्छितं दृष्ट्वा, पृच्छाति सान्तिकान् जनान् । ज्ञात्वा तत् कारणं तेभ्यः, वक्तिः पत्युः श्रुताविति ॥११०॥ इयं सुकोमला स्वामिन्, आगतास्ति तवान्तिके । दृष्टः पुत्रो जनन्या वै, तस्मात् पुत्रं विलोकय ॥ १११ ॥ तस्यां बाढं प्रजल्पन्त्यां, लब्धसंज्ञो यदाभवत् । स्त्रीवचसा तदा तस्य, स्वरपरिचयोऽभवत् ॥ ११२ ॥ अथोन्मीलितनेत्रश्च, पश्यति च सुकोमलाम् । साह दयां विधायार्य !, स्त्रियं पश्य सपुत्रकाम् ॥ ११३ ॥ संप्राप्तो विशदां शुद्धिं, पश्यति च सुतादिकम् । वस्तुसारो द्विजः सोऽथ, प्राप सौस्थ्यं शनैश्शनैः॥ ११४ ॥ सोमिलो लौकिकार्थं द्रागू, वस्तुसारगृहे तदा । आगतः सोमिलायुक्तो, लोकाचारो महान्यतः ॥ ११५ ॥ शोके प्रतिनिवृत्तेऽथ, सारं वदति सोमिलः । गम्यते तत्र सर्वैर्वै, विलंबं मा कुरू वृथा ॥ ११६ ॥ बभाषे वस्तुसारोऽथ, कोमलाजनकं प्रति । तत्राहं नागमिष्यामि, अस्मिन् जन्मनि निश्चितम् ॥ ११७ ॥ आगच्छेत् यदि ते पुत्री, तदा सुखेन तां नय । वर्तते हि ममानुज्ञा, यथारुचि तथाकुरू ॥ ११८ ॥ जगाद सोमिलः पुत्रि, एहि नाम निजे गृहे । सुकोमला जगावेवं, यत् स्थिताऽहं निजे गृहे ॥ ११९ ॥ अस्मिन् जन्मनि हे तात, नागमिष्यामि ते गृहे । घृतं विनापि भक्तं हि, मन्येहममृतोपमम् ॥ १२० ॥ शुष्कान्नेन सदात्रैव, निर्गमि-

ष्यामि जीवितम् । आज्यखंडादियुक्भक्तं, विषोपमं हि ते गृहे ॥ १२१ ॥ विलक्षोऽथ निजे गेहे, एकाकी सोमिलो गतः । शान्ति-
पुरेऽथ सारो हि, सप्रियापुत्रकोऽवसत् ॥ १२२ ॥ शत्रुमर्दनभूपालात्, सारः प्राप्तजीविकः । पाठयति निजं पुत्रं, त्रिवर्गं साधयन्
सुखम् ॥ १२३ ॥ अन्यदा भूपयुक्तोऽसौ, गतोद्यानानिरीक्षितुम् । पश्यतस्तौ मुनिं तत्र, कायोत्सर्गस्थितं मुदा ॥ १२४ ॥ योग्य-
जीवौ मुनिर्ज्ञात्वा, मुक्त्वा ध्यानं निजं तदा । देशनां विदधे साधुर्भव्यजीवोपकारिणीम् ॥ १२५ ॥ देशनान्ते नृपोऽपृच्छद्, मन्ये
त्वां सुकुलोद्भवम् । अस्मिंश्च यौवने स्वामिन्, गृहीतं संयमं कथम् ॥१२६॥ साधुः प्रोवाच हे राजन् !, संसारोऽयं भयङ्करः ।
तस्मात् त्यक्त्वा च संसारं, अङ्गीकृतं मया व्रतम् ॥ १२७ ॥ भूपालः प्राह हे स्वामिन् !, कथं भयङ्करं जगत् । कृत्वा कृपां
मयि ब्रूहि, कारणं भयकारकम् ॥१२८॥ साधुर्बभाण हे राजन् !, अन्यया कथया स्मृतम् । पुरोहितकथा या हि, विश्वेका सा भयङ्करा
॥१२९॥ नृपोऽवदच्च हे स्वामिन् !, वर्तते मे गुरुः सुखी । तस्य नो दुःखलेशोऽपि, कथं दुःखी पुरोहितः । ॥१३०॥ संसारे न सुखी
कोपि, विश्वो हि दुःखसागरः । अस्य पूर्वभवं राजन् !, श्रृणु आश्चर्य कारकम् ॥ १३१ ॥ राजपुरे शुभे ग्रामे, सूरसेनाभिधो व-
णिक् । भानुमती प्रिया तस्य, संतानेन विवर्जिता ॥ १३२ ॥ रामरथाभिधस्तत्र, तस्याभूत् प्रातिवेश्मिकः । सुन्दरी गेहिनी तस्य,
गुणसौन्दर्यशोभिता ॥ १३३ ॥ पुत्र एकस्तयोरासीत्, द्वित्री संवत्सरात्मकः । मन्दं गच्छति सोबालः, मन्दं मन्दं च भाषते ॥१३४॥
भानुमती च सेनोऽथ, तं शिशुं निजपुत्रवत् । लालयतोऽति हर्षेण, भोज्येनाभरणादिना ॥१३५॥ अपुत्रस्तु परं पुत्रं, स्वपुत्रमिव म-
न्यते । रक्षतस्तं निजे हर्म्ये, स्वपुत्रमिव तौ सदा ॥ १३६ ॥ रामरथोऽन्यदा कस्माद्, ग्रामादागतवान् गृहे । पृच्छति च निजां
भार्यां, क्व गतोऽस्ति सुतः प्रिये ! ॥ १३७ ॥ भार्या वदति पार्श्वस्थं, गृहं गच्छति सर्वदा । जगाम सो गृहे तस्य, पुत्रं द्रष्टुं मु-
दा तदां ॥ १३८ ॥ यावत् याति रथस्तत्र, तावत् द्वारे स्थिता च सा । प्रोवाच भानुमत्येवं, पुत्रो नास्ति हि मे गृहे ॥१३९॥
प्रियां प्राह रथोऽभेत्य, तत्र नास्ति सुतः खलु । दंपति तु तदा बालं, शोधनार्थं विनिर्गतौ । ॥ १४० ॥ इतस्ततो विसुद्ध्यन्तौ,
भ्रमतः प्रतिपाटकम् । कुतो न प्रापतुर्बालं, तेन चिन्ता तुरौ हि तौ ॥१४१॥ इतश्च सूरसेनोऽथ, गेहमागतवान् तदा । चिन्तापरौ

हि तौ दृष्ट्वा, पृष्टवान् कारणं किमु ॥ १४२ ॥ जगौरथोथ हे भ्रातः, पुत्रः क्वापि न दृश्यते। कृता शुद्धिर्हि सर्वत्र, परं न लभ्यते क्वचित् ॥ १४३ ॥ समागच्छाम्यहं शीघ्रं, मुक्त्वा भारं निजे गृहे। गृहे गतो निजां भार्याम्, हसन्तीमीक्षते मुहुः ॥ १४४ ॥ गृहान्तरे हि क्रीडन्तं, बालमसौ समीक्ष्य च। चुम्बति तं महामोहा-दत्यंतस्नेहपूर्वकम् ॥ १४५ ॥ पृच्छतिस्म तदा नारीं, अयोग्यं किं कृतं त्वया। सा जगाद मयैतत्तु, नर्मणा कृतमेव हि ॥ १४६ ॥ सूरसेनो जगादेव-मयुक्तं हि त्वया कृतम्। आनाय्य च रथं तत्र, तत् पुत्रकं मुदा ददौ ॥ १४७ ॥ एवं तु स्वस्थतां प्राप्तौ, कथञ्चित् दम्पती तु वै। तेन बद्धान्तराया सा, मृतेयाय भवान्तरम् ॥ १४८ ॥ सूरसेनस्य जीवस्तु, अयं पुरोहितश्च ते। सुन्दरी रामकौ जातौ, कोमला पितराविह ॥ १४९ ॥ भानुमति जनी जाता, वस्तुसारस्य संप्रति। न दृष्टं पौत्र वक्त्रं च, भवेऽस्मिन् तेन कर्मणा ॥ १५० ॥ चित्रा गतिस्तु दैवस्य, वाचामगोचरा हि सा। श्रुत्वैतद् वस्तुसारोथ, प्राप जातिस्मृतिं तदा ॥ १५१ ॥ कृत्वाञ्जलिं मुदा तत्र, प्राहमुनिवरं प्रति। भवता कथितं तत्तु, सत्यमेव महामुने ! ॥ १५२ ॥ गत्वा गृहे स्वपुत्राय, अर्पयित्वा धनादिकम्। आगच्छामि व्रतार्थञ्च, कृपां विधाय तिष्ठतु ॥ १५३ ॥ पुरोहितेन राज्ञा च, परिवारेण सार्धकम्। गृहीतः संयमस्तत्र, गुरोः पार्श्वे प्रमोदतः ॥ १५४ ॥ पालयित्वा सुचारित्रं, निर्दोषमप्रमादतः। सुखं देवगृहे भुक्त्वा, मोक्षमापुः विदेहके ॥ १५५ ॥ चरित्रं वस्तुसारस्य, श्रुत्वा भव्या ! वि-चार्यं च। केषामपि न कर्तव्यं, नर्मादिकं सुदुःखदम् ॥ १५६ ॥ 'निपुणाः सर्वशास्त्रेषु, नरेशादि प्रबोधकः। आगमोद्धारकर्तारोः, देवर्द्धिरिव योधुऽना ॥ १५७ ॥ राजरङ्कौ समौ येषां, समौ शत्रुसुमित्रकौ। जयन्तु सूरयस्ते वै, आनन्दसागरा भुवि ॥१५८॥ तेषां शिष्यस्य दक्षस्य, क्षान्त्यादिगुणशालिनः। व्याख्याने सुप्रविणस्य, पाठकस्य क्षमाम्बुधेः ॥ १५९ ॥ शिष्येण लघु भूतेन, त्रैलोक्या-भिधवार्धिना। वाग्वरे च शुभे देशे, आसपुराभिधे पुरे ॥१६०॥ खवसुवेदनेत्रे (२४८०) वै, वीरवर्षे शुभे तथा। विक्रमे रुद्रव्योमाक्षि-(२०११) संज्ञके हायने मुदा ॥१६१॥ शुभे कार्तिकमासे च, पञ्चमीवासरेऽसिते। माणिक्याब्धिमहासूरेः, गच्छनेतुस्समाश्रये ।१६२। संपूर्णा लघुकाकारा, एषा विश्वहितावहा। कथा पद्येन संदृब्धा, प्राश्वनाथप्रसादतः ॥ १६३ ॥ सूर्योदयप्रबोधाभ्यां, द्रङ्गे कर्पट-

वंजके । शुद्धिरस्य चरित्रस्य, कृता वै शुभभावतः ॥ १६४ ॥ तुलाकृष्णेति नामा यः, पण्डितेषु महोत्तमः । दृष्टिपातः कृतस्तेन, अभयज्ञानमन्दिरे ॥ १६५ ॥

## ॥ इतिश्रीवस्तुसारचरित्रम् ॥

# ॥ श्रीरत्नपालचरित्रम् ॥

ज्ञातकुले महासूर्यं, मिथ्यात्वतमनाशकम् । महावीरं जिनं वन्दे, भव्यानां हितकारकम् ॥ १ ॥ वन्देऽहं श्रीगणाधीशान्, गौतमादिमुनीश्वरान् । महालब्धिधरांस्तांश्च, अत्यन्तशुभभावतः ॥ २ ॥ वन्देहं तं महासूरिं, आनन्दाब्ध्यभिधानकम् । आगमोद्धारकर्त्तारं, पंचमारे प्रभावकम् ॥ ३ ॥ शान्तमूर्तिं सदानन्दं, क्षमासागरपाठकम् । महोपकारिणं नत्वा, पंचाचारपवित्रितम् ॥ ४ ॥ चरित्रं रत्नपालस्य, करोमि गुरुभक्तितः । स्वान्यजीवोपकाराय, चित्ताह्लादप्रदायकम् ॥ ५ ॥ (युग्मं) भो भव्या ! श्रुयतां शास्त्रं, शुद्धभावेन सर्वदा । शास्त्रेण च महालाभो, वीरेणेति प्रकाशितम् ॥ ६ ॥ श्रीवीरप्रभुणाप्येवं, भाषितं निजपर्षदि । "माणुसत्तं सुई सद्धा, संजमंमिय वीरियं" ॥७॥ चतुर्ष्वङ्गेषु मध्ये तु, द्वितीयं श्रुतिरुच्यते । त्यक्त्वाऽलस्यं तु भो भव्याः !, सादरं श्रूयतां मुदा ॥८॥ श्रुत्या श्रीरत्नपालेन, साधितं च शिवं खलु । तस्य निदर्शनं वक्ष्ये, यथा पूर्वं मया श्रुतम् ॥ ९ ॥ मेदपाटे शुभे देशे, लक्ष्मीपुरं महापुरम् । सदाचारिजनाकीर्णं, धनधान्यादिसंभृतम् ॥ १० ॥ अनेकजिनचैत्यानि, शोभन्ते यत्र नित्यशः । ध्वजादिकेन युक्तानि, जनचेतोहराणि च ॥ ११ ॥ देवपालो नृपस्तत्र, यथार्थगुणधारकः । मोहिनीति प्रिया तस्य, शिलालङ्कारधारिणी ॥१२॥ धन-

ञ्जयो वणिक् तत्र, धनेन रहितस्सदा। चन्द्रया भार्यया सार्धं, दुःखेन वसति स्म सः ॥ १३ ॥ लोकस्य कृपया सोऽथ, किञ्चि- ञ्ज्ञात्वा क्रयाणकम्। ग्रामेषु विक्रयं कृत्वा, निर्वाहं तु करोति सः ॥ १४ ॥ इतः कश्चिन् महेभ्योऽथ, महाकुटुम्बधारकः। पूर्ण- भद्राभिधानोऽपि, तत्र वसति पाटके ॥ १५ ॥ धनञ्जयप्रिया चन्द्रा, भर्तृरक्ता सुलक्षणा। क्रमाद् गर्भवती जाता, वर्णेन परिवर्तिता ॥ १६ ॥ पूर्णकालेऽथ चन्द्रा सा, प्रासूतैक सुतं तदा। किञ्चित्सुलक्षणोपेतं, सर्वाङ्गेन सुशोभितम् ॥ १७ ॥ तयोः पुत्रमुखं दृष्ट्वा, हर्षोऽत्यन्तोऽभवत्तदा। 'कस्य मोदो न जायेत, संसारे सुतजन्मनि' ॥ १८ ॥ पञ्चाह्निके सुते जाते, धनञ्जयो व्यपद्यत। शीर्ष- वेदनयाऽकाले, 'कर्मणा को हि छुट्यते' ॥१९॥ भर्तुर्विरहदुःखिन्या, कृत्वाऽतिक्रन्दनं तदा। तया पुत्र मुखं दृष्ट्वा, शनैर्दुःखं विस- र्जितम् ॥ २० ॥ चन्द्रा तस्याङ्गजस्याह्वं, मानचन्द्रं व्यधात् मुदा। वैतनिकादिकं कृत्वा, पालयति सुतं सुखम् ॥ २१ ॥ एवं मासाष्टके जाते, ज्वरादिपीडया च सा। निराधारं सुतं मुक्त्वा, दीर्घनिद्रां समासदत् ॥ २२ ॥ मिलित्वा स्वजनैस्तत्र, कृता सर्वोचिता क्रिया। बालो न पालितः कैश्चित्, 'को हि द्रव्यं विना निजः' ॥ २३ ॥ सम्बन्धो नास्ति मे कश्चिद्, एवमुक्त्वा स्व- गोत्रजाः। गता स्वके स्वके स्थाने, 'धनैराकृष्यते जनः' ॥२४॥ केनाप्यरक्षितो बालो, रोदीति च महास्वरैः। तदा दयार्द्रभावेन, पूर्णचन्द्रो व्यचिन्तयत् ॥ २५ ॥ समादाय निजे गेहे, पालयामि स्तनन्धयम्। स्नुषादिकाभिरेतस्य, पयःपानं भविष्यति ॥२६॥ सन्ति मम सुताः पञ्च, पञ्चाऽपत्यान्विताः स्नुषाः। क्रमेण चास्य बालस्य, पोषणं नु भविष्यति ॥ २७ ॥ चिन्तयित्वा च स श्रेष्ठी, गृहीत्वा तं स्तनन्धयम्। समादाय निजे गेहे, स्नुषाभ्यश्चार्पयत्तदा ॥ २८ ॥ संभूय ताश्च सर्वास्तु, क्रमेण तं स्तनन्धयम्। कारयित्वा पयःपानं, पालयन्ति सदा मुदा ॥ २९ ॥ श्रेष्ठिना पञ्चमे वर्षे, सद्मकार्ये नियोजितः। बालको मानचन्द्रोऽथ, वत्सा- दिकं ह्यचारयत् ॥ ३० ॥ श्रेष्ठिगृहेषु ये बालाः, कुर्वन्त्यध्ययनं सदा। तैः सार्धं मानचन्द्रोऽपि, लेखनगणनादिकं ॥३१॥ अभ्यासं च करोत्येवं, पूर्वपुण्यानुसारतः। कालेनाल्पेन चन्द्रोऽथ, बुध्या सुशिक्षितोऽभवत् ॥ ३२ ॥ (युग्मं) श्रेष्ठी क्रमेण तं चन्द्रं, हट्ट- कार्ये न्ययोजयत्। अहर्निशं च कार्याणि, करोति शुद्धभावतः ॥ ३३ ॥ भानुचन्द्राभिधः कश्चिद्, अथाष्टादशवार्षिकं, चन्द्रं जगौ

रहस्येवं, पूर्णचन्द्रस्य ईर्षया ॥ ३४ ॥ भोश्चन्द्र ! श्रुणु मे वार्तां, श्रेष्ठी चासौ पिता तव । करोति ते न सम्बन्धं, तत्र किं कारणं वद ॥ ३५ ॥ कान्तिचन्द्रस्य सम्बन्धो, राजचन्द्रगृहे कृतः । देवदत्तस्य लग्नं तु, कृतं महोत्सवेन वै ॥ ३६ ॥ सम्बधो विहितोऽन्येषां, क्रियते किं न ते पुनः । चन्द्रो जगाद हे तात !, पृच्छायां कारणं वद ॥ ३७ ॥ चिन्तेयं मम तातस्य, किं पृच्छति भवान् पुनः । मम कार्ये विलंम्बोऽभूत्, गच्छामि त्वरितञ्च भोः ॥ ३८ ॥ प्रोवाच भानुचन्द्रस्ते, लग्नं सो न विधास्यति । चेन्मयि प्रत्ययो न स्यात्, पृच्छेस्त्वं श्रेष्ठिनं निजम् ॥ ३९ ॥ अथैकदा च स श्रेष्ठी, सान्ध्यं कृत्यं समाप्य च । स्वकुटुम्बं समाहूय, करोति स्म कथादिकम् ॥४०॥ तस्मिन्नवसरे चन्द्रः, पृच्छति श्रेष्ठिनं प्रति । यौवनस्थस्य मे लग्नं, विधास्यति कदा भवान् ॥४१॥ ? श्रेष्ठी जगौ न पृष्टोऽयं, विषयस्तु कदा त्वया । अद्यैव पृच्छसि तत्र, किमस्ति कारणं वद ॥४२॥ चन्द्रो बभाण भो तात !, विना लग्नं तु जीवनम् । निरर्थकं भवेन्नूनं, विवाहः क्रियते ततः ॥ ४३ ॥ श्रेष्ठो जगाद भोश्चन्द्र !, न स्याल्लग्नं धनं विना । तव पार्श्वे तु नो द्रव्यं, तस्माद् द्रव्यं समार्जय ॥ ४४ ॥ पितस्त्वं किं वदस्येवं, देवदत्तादिभिर्यतः । किं समुपार्जितं द्रव्यं ?, तेषां लग्नं कृतं त्वया ॥ ४५ ॥ एते हि सन्ति मत्पुत्राः, धनञ्जयसुतोऽसि नु । तव लग्नादिकार्यार्थं, करोमि न धनव्ययम् ॥ ४६ ॥ मृतौ ते पितरौ बाल्ये, मयानुकंपया तदा । सद्मनि त्वं समादाय, पालितो यत्नतः सदा ॥ ४७ ॥ पालनेन पिताऽहं तु, जन्मदानेन नो खलु । तस्माद्विवाहकार्यार्थं, नो यतिष्ये कदाचन ॥ ४८ ॥ द्वितीयेऽहनि चन्द्रोऽथ, भानुचन्द्रं व्यजिज्ञपत् । स श्रेष्ठी मम लग्नं न, करोति द्रविणं विना ॥ ४९ ॥ तस्मात् त्वमेव हे तात !, लग्नादिकं च कारय । त्वयैव कथितं कार्यं, त्वमेव परिसाधय ॥ ५० ॥ बभाषे भानुचन्द्रोऽथ, भवेल्लग्नं सुखावहम् । जघन्येनापि ते पार्श्वे, द्विसहस्रं धनं यदि ॥ ५१ ॥ उवाच मानचन्द्रोऽथ, पार्श्वे नास्ति कपर्दिका । कथं वार्ता सहस्रस्य, द्वयस्य क्रियते त्वया ॥ ५२ ॥ भानुर्जगौ विना द्रव्यं, लग्नादिकं कथं भवेत् । द्रव्यार्जनाय भोश्चन्द्र, उद्यमं कुरु यत्नतः ॥५३॥ चन्द्रः प्राह न जानामि, द्रव्यार्जनं कथं भवेत् । ततस्त्वं कथयोपायं, येनाहं स्यां सुखं धनी ॥५४॥ पूर्वं सूर्योदयात्त्वं तु, याहि वनमहर्निशम् । काष्ठभारं समानीय, विक्रीणीथाः पुरे सदा ॥ ५५ ॥ लप्स्यसे रूप्यकार्धं यद्, एवं

कुर्वन् धनी भवेः । दर्शितोऽयं मयोपायो, यथारुचि तथाकुरू ॥ ५६ ॥ श्रुत्वोपायं तु चन्द्रोथ, अतीव मुमुदे तदा । तदीयमुपकारं सो, हृदि बिभ्रद् गतो गृहे ॥५७॥ एकदा पूर्णभद्राय, निजाशयमसौ जगौ । तात ! तवोपकारस्तु, महानास्ति ममोपरि ॥ ५८ ॥ यद् बाल्ये पोषणं कृत्वा, जीवितमर्पितं मम । तेन तवोपकरं तु, विस्मरिष्यामि नो कदा ॥ ५९ ॥ परं लग्नादिकार्यार्थं, यामि निज पितुर्गृहे । श्रेष्ठ्युवाच चिरं जीव, कार्यं कुरु सुखेन भोः ॥ ६० ॥ याहि त्वं तु निजे गेहेऽदर्शयत् तद्गृहं च सः । समादायाशिषं नत्वा, ययौ स्वकीयवेश्मनि ॥ ६१ ॥ जीर्णशीर्णं निजं गेहं, मार्जयित्वाऽवसत्तदा । विधिं च भानुचन्द्रोक्ता, महर्निशं करोत्यसौ ॥ ६२ ॥ प्रथमे दिवसे प्राप, सोद्यमी द्वादशाणकम् । मध्यरात्रौ तकं कोपि, यत् किञ्चित् कार्यमादिशेत् ॥ ६३ ॥ तत् कार्यं समये तस्मिन्, लाभाशया करोति सः । एवं चातिश्रमं कृत्वा, करोति धनसञ्चयम् ॥ ६४ ॥ एवं तृतीयवर्षान्ते, पञ्चदश शतानि च । रुप्यकानि तु जातानि, तेनामोदं दधार सः ॥ ६५ ॥ चिन्तयति निजे चित्ते, वर्षान्ते भावि तद्धनम् । तदा विवाह कार्यञ्च, महामहैर्भविष्यति ॥ ६६ ॥ लग्ने जाते स्त्रिया सार्धं, भोगान् भोक्ष्ये स्वयं सदा । एवं मनोरथं कुर्वन्, व्यतियिवान् दिनानि सः ॥ ६७ ॥ संपूर्णे द्विसहस्रे तु, भानुचन्द्रश्च मे सखा । लग्नादिसर्वकार्यं सः, सानन्देन करिष्यति ॥ ६८ ॥ एकदा जैष्ठमासे च, चन्द्रो भानूदये सति । कान्तारे दलिकार्थञ्च, गतोस्ति द्रव्यकांक्षया ॥ ६९ ॥ तत्राऽपि स गतो दूरे, गृहीत्वा काष्ठभारकम् । पुरिद्वारे समायतो, मध्यं दिनं तदाऽभवत् ॥ ७० ॥ तापार्दितस्तृषाक्रान्तो, जगामोपवनं स हि । भारिकां स्थापयित्वाऽधो, वाप्यां जलाशयाऽगमत् ॥ ७१ ॥ पीत्वातिशीतलं वारि, पादशुद्धिं विधाय च । विश्रामाय तटे तस्या, उपाविशन्मुदा तदा ॥ ७२ ॥ शीतलवायुना तस्य, नेत्रे संवेद संयुते । तेन सुष्वाप तत्रैव, गाढनिद्रावशङ्गतः ॥ ७३ ॥ पश्यति स्वप्नमेवञ्च, मानसानन्ददायिनम् । सुश्रेष्ठिसुतया सार्धं, पाणिग्रहोऽभवन्मम ॥ ७४ ॥ 'भावना यादृशी यस्य, तस्य स्वप्नादिकं हि तत् ।' आयाति सदृशं लोके, तस्मात् तस्य बभूव हि ॥ ७५ ॥ हस्तमोचनकाले तु, सप्तभूमिगृहं महत् । दासादिपरिवारञ्च, दत्तं धनादिकं तदा ॥ ७६ ॥ भुञ्जानोऽहर्निशं भोगान्, तयासार्धं यथेच्छया । कालन्तु गमयामास, देवसद्मनि देववत् ॥७७॥ सगर्भा मम भार्या सा, पुत्रं प्रासूत सुन्दरम् ।

द्वितीया शशिवत् सोऽथ, संवर्द्धते दिने दिने ॥ ७८ ॥ एकदा त्वावयोस्तत्र, पल्यङ्के सुप्तयोस्तदा। प्रिया जगाद मां देव, समाकर्णय मे वचः ॥ ७९ ॥ दूरमपसर त्वं तु, स्तनन्धयस्य हेतवे। इतो नास्त्योवकाशो हि, तत्तं त्वमेव देहि भोः ॥ ८० ॥ यावत्सरत्यसौ सुप्त-स्तावद् वाप्यां पपात च। कूपे पतन्नसौ चन्द्रः, श्लोकमेकं जगौ तदा ॥८१॥ स्वप्ने या सुन्दरीजाता, सा वाप्यां मम पातुका। साक्षाद्यस्य भवेन्नारी, का गतिस्तस्य वै भवेत् ॥ ८२ ॥ भाषायां–"सपनाकेरी सुन्दरी, दीया कुवेमे डाल। जो परणे यह सुन्दरी, उसके केसे हाल ॥ ८३ ॥" एवमुदीर्यमाणोऽसौ, पपात वापिका तले। भाग्य योगेन यज्जातं, तत् तस्य कथयाम्यतः ॥ ८४ ॥ इतश्च भूपतिर्देव-पालस्तापार्दितस्तदा। तस्मिन्नेव वने सोऽपि, विश्रामाय समागतः ॥ ८५ ॥ श्रुत्वा पतन-घोषञ्च, शीघ्रं वाप्यामुपस्थितः। मानुषं पतितं दृष्ट्वा, कर्षणाय समुद्यतः ॥ ८६ ॥ आदिष्टानुचरैस्तञ्च, बहिष्कृष्ट्वं स भूपतिः। पृ-च्छति स्म कथं कूपे, पतितः कारणं वद ॥ ८७ ॥ ममानुमानमेत्तत्तु, केनापि पातितस्त्वकम्। यत्तव ब्रूवतः पातः, तदिदं मेऽ-नुमापकम् ॥ ८८ ॥ तस्य नाम तदाख्याहि, शिक्षां तस्मै ददाम्यहम्। चन्द्रः प्राहानुमानं तु, निःशङ्कं सत्यमेवहि ॥ ८९ ॥ तस्मै शिक्षां परं कोऽपि, कर्तुमीशो न भूतले। तस्माद् वृथाहि तन्नाम, कथं ब्रुवे भवत् पुरः ॥ ९० ॥ मां नो जानासि भोस्त्वं तु, अहञ्च नगराधिपः। तस्य नाम समाख्याहि, शिक्षां दातुमहं क्षमः ॥९१॥ सत्यं वदामि हे राजन्!, किञ्चित्त्वं न करिष्यसि। विज्ञापयामि हे स्वामिन्!, मौनमेवात्र धार्यताम् ॥ ९२ ॥ चिन्तयति तदाराजा, ममाग्रे किं वदत्यसौ। पट्टपुत्रमहिष्योर्हि, पक्षपातो न मे हृदि ॥ ९३ ॥ सर्वेषां हि यथानीति, शिक्षायै शक्तिमानहम्। नाहमस्मिञ्जने शक्तः, एवं किं कथयत्यसौ ॥ ९४ ॥ आवेशात् प्राह राजा तं, कार्येऽस्मिन् न क्षमः कथम्। तस्य सत्यनिदानं तु, त्वरितं वद मे पुरः ॥ ९५ ॥ चन्द्रो जगाद हे स्वामिन्!, अत्रत्यश्रेष्ठि-कन्यया। कूपे मे पतनं जातं, नान्यत् किमपि कारणम् ॥ ९६ ॥ निशम्यैवं तदा राजा, समादिशन्नियोगिनः। गत्वा युयञ्च तां कन्यां, समानयत सत्वरम् ॥ ८७ ॥ सेवकाः गमनार्थं तु, यदा यत्नं च कुर्वते। चन्द्रो जगौ शृणु स्वामिन्, मे चरित्रं रसप्रदम् ॥ ९८ ॥ सर्वं निजचरित्रं सो, नृपाग्रेऽवर्णयत्तदा। स्वामिन्नद्यैव निद्रायां, स्वप्नोदृष्टो मया खलु ॥ ९९ ॥ तेनाहं कथयामि त्वां,

शिक्षां कर्तुं न अर्हसि। सत्यं ब्रवीषी हे चन्द्र!, ततस्तां नहि शिक्षयेत् ॥ १०० ॥ पुनः पृच्छति भूपालो, वाप्यां निपततस्तव। आननात् कीदृशं वाक्यं, समुत्पन्नं तदुच्चर ॥ १०१ ॥ चन्द्रो बभाण हे स्वामिन्!, पतनावसरे मुखात्। यद्वाक्यं मे समुद्भुतं, श्रावयामि भवत्पुरः ॥ १०२ ॥ स्वप्ने या सुन्दरी जाता, सा वाप्यां मम पातुका। साक्षाद्यस्य भवेन्नारी, का गतिस्तस्य वै भवेत् ॥ १०३ ॥ राजा प्रोवाच सत्यं भोः!, स्त्रीणां गतिर्विलक्षणा। विश्वासो नैव कर्तव्यः, शत्रुर्मित्रं च सा भवेत् ॥ १०४ ॥ उक्तं च- "रागो वा यदि वा द्वेषः, कोपि लोकोत्तरः स्त्रियाः। ददाति रागिणी प्राणा-नादत्ते द्वेषिणी च सा ॥ १०५ ॥" एवमुक्त्वा नृपालस्तु, गतस्तदा निजालये। मानचन्द्रो निजे चित्ते, चिन्तयामासिवानिदम् ॥ १०६ ॥ किं करोमि क्व गच्छामि, कस्याग्रे कथयाम्यहम्। परिणीता वधूस्वप्ने, मे कूपे क्षेपिकाऽभवत् ॥ १०७ ॥ नागमिष्यत्तु भूपालो-ऽभविष्यन्मरणं मम। तेन लग्नादिकं कार्यं, विदधामि न वाधुना ॥ १०८ ॥ एतस्मिन् विषये कोऽपि, सज्जनः पृच्छते मया। एवमितस्ततः पश्यन्, अद्राक्षीत् मुनिपं तदा ॥ १०९ ॥ आम्रवृक्षतले सोऽथ, ध्यानमग्नसमास्थितः। तस्य मुनिगणश्चापि, ज्ञानध्यानसमाहितः ॥ ११० ॥ कायोत्सर्गे स्थितः कोऽपि, अध्ययनं करोति कः। ददाति वाचनां कोऽपि, केऽपि गृह्णन्ति तां मुदा ॥ १११ ॥ ईदृग्गणेन संयुक्तं, दृष्ट्वा सो मुनिपं तदा। चिन्तयति निजे चित्ते, अयं कोऽपि महामुनिः ॥ ११२ ॥ पृच्छाम्यस्मै विचारं तं, चित्ते यो धारितो मया। गत्वा सूरिसमिपेऽसौ, तं नत्वा समुपाविशत् ॥ ११३ ॥ ध्यानं समाप्य सः सूरिः, धर्मलाभाशिषं ददौ। सूरिः पृच्छति योग्यं तं, किमर्थमागतोऽसि भोः! ॥ ११४ ॥ जगौ चन्द्रोऽथ हे स्वामिन्!, आजन्मातीवदुःख्यहम्। भानुना दर्शितोपायः, सुखार्थं पालितो मया ॥ ११५ ॥ रूप्यकाणि हि जातानि, पञ्चदशशतानि मे। अन्यत् पञ्चशतं चास्मिन्, वर्षे पूर्णं भविष्यति ॥ ११६ ॥ मूलं सुखस्य भार्याऽस्ति, प्रसिद्धं भूतले सदा। तेन दारनिमित्तञ्च, द्रव्यार्जनं मया कृतम् ॥ ११७ ॥ परं स्वप्ने मया स्वामिन्, कृतः पाणिग्रहो मुदा। कूपे पातो हि सञ्जातः, स्वप्नवनितया तया ॥ ११८ ॥ साक्षाद् या च भवेन्नारी, तया किं न भवेद् भुवि। तेन चञ्चलचित्तोऽहं, विमृशामि मुहुः प्रभो ॥ ११९ ॥ ततः पृच्छाम्यहं स्वामिन्!, लग्नकार्यं करोमि किम्। सूरिः प्रोवाच भो

भद्र !, दुःखमूलं हि सुन्दरी ॥ १२० ॥ नागमिष्यत् तदा राजा, भविष्यज्जन्मनिष्फलम्। दारसंगे कृते किं तु, महादुःखं भवे भवे ॥ १२१ ॥ अस्मिन्नपि भवे दुःखं, गृहोपस्करपूरणे। यदीच्छा ते सुखस्यास्ति, गृहाण संयमं मुदा ॥ १२२ ॥ चन्द्रो जगाद हे स्वामिन् !, सुखे मम प्रयोजनम्। भावनाऽपि सुखस्यार्थं, ततो यच्छतु संयमम् ॥ १२३ ॥ सूरिरुवाच भोश्चन्द्र !, किञ्चिद्ध्ययनादिकम्। उषित्वा मम पार्श्वे त्वं, कुरुष्व मुनिभिस्सह ॥ १२४ ॥ चन्द्रो जगाद हे स्वामिन् !, भवत्सार्थे वसाम्यहम्। भोजनस्य प्रबन्धस्तु, कया रित्या भविष्यति ॥ १२५ ॥ नाहं द्रव्यव्ययं कर्तुं, समर्थोऽस्मि मनागपि। सूरिराह न कर्तव्या, चिन्ता तु भोजनादिके ॥ १२६ ॥ साधु सार्थे भवेत् कोऽपि, तस्य चिन्ता तु श्रावकाः। सुतादिवच्च कुर्वन्ति, निश्चिन्तो भव तेन हि। ॥ १२७ ॥ चन्द्रोऽथ सूरिणा सार्धं, विहारं च सदाऽकरोत्। द्रव्यं बद्ध्वा सुकक्ष्यां च, निश्चिन्तमनसा सुखं ॥ १२८ ॥ साधुयोग्यं क्रियालापं, जीवादितत्त्वविस्तरम्। चन्द्रः पठितवान्सोऽथ, स्वल्पकालेन यत्नतः ॥ १२९ ॥ चन्द्रो वैराग्यभावेन, सूरिं विज्ञप्तवांस्तदा। संयमं यच्छतु स्वामिन् !, योग्यता यदि मे भवेत् ॥ १३० ॥ सूरिः प्राह गमिष्यामः, वसन्तपुरपत्तने। तत्र दीक्षां प्रदास्यामि, यदि श्राद्धस्य भावना ॥ १३१ ॥ तत्रानुमोदना भावि, शासनस्य प्रभावना। या सम्यक्त्वस्य मूलं हि, कीर्तितञ्च बहुश्रुतैः ॥ १३२ ॥ सूरिं सपरिवारञ्च, वसन्तपुरपत्तने। श्राद्धाः प्रावेशयन् भूरिविज्ञप्तिसमहाहैः ॥ १३३ ॥ देशनां विदधे सूरिः, भव्यानामुपकारिणीम्। श्रुत्वा सर्वे जनाः लुब्धाः, देशनाश्रवणे सदा ॥ १३४ ॥ पञ्चाष्टकदिने जाते, श्रावका मुनिपं जगुः। चातुर्मास्यं तु अत्रैव, कर्तव्यं मुनिपुंगव ! ॥ १३५ ॥ तेन धर्मप्रभावश्च, लोके विस्तरमेष्यति। सुरिरुवाच भोः श्राद्धाः, युष्माकं भावना शुभा ॥ १३६ ॥ श्रावकाः जगदुः स्वामिन् !, संघाग्रणीश्च वर्तते। रत्नपालाभिधः श्रेष्ठी, विख्यातो नगरे सदा ॥ १३७ ॥ द्रव्योपार्जनरक्तोऽसौ, उपाश्रये च मन्दिरे। द्रव्यव्ययभयाच्छ्रेष्ठी, नायाति कृपणः कदा ॥ १३८ ॥ इभ्यं विना न विज्ञप्तिं, कर्तुमीशा वयं प्रभोः। सूरिरुवाच यास्यामि, विज्ञप्ताप्छा न मे खलु ॥ १३९ ॥ श्राद्धा उचुस्तदा स्वामिन् !, तं श्रेष्ठिनं प्रबोधय। येन बुद्धो भवेद्धर्मी, धर्मकार्ये सहायकृत ॥ १४० ॥ सूरिराह गृहे तस्य, यामि किं बोधनाय भोः !। उपाश्रये न

आयाति, तस्य बोधो भवेत् कथम् ॥ १४१ ॥ अवोचन् धर्मिणः सूरे !, आनयामस्तमत्र हि । लीलया देशनां दत्वा, भवेद्धर्मी तथा कुरु ॥ १४२ ॥ सूरिराह यदि श्राद्धाः !, लघुकर्माऽऽगमिष्यति । बोधयित्वोपदेशेन, स्थिरीकार्यो मया हि सः ॥१४३॥ अथ श्राद्धाः समागत्य, रत्नपालस्य मन्दिरे । श्रेष्ठिनं तं समाचख्युः, अत्रागता हि सूरयः ॥ १४४ ॥ व्याख्यां कुर्वन्ति शास्त्रस्य, अनिशं धर्महेतवे । अनेकयुक्तिसंयुक्तां, समेहि तदुपाश्रये ॥ १४५ ॥ श्रेष्ठ्युवाच न दिष्टो भो !, बहुकार्याणि सन्ति मे । तेनागन्तुं न शक्नोमि, यूयं शृणुत सादरम् ॥ १४६ ॥ पुनः प्राहुश्च ते श्राद्धा, अद्य कार्याणि भूरिशः । कल्ये तु निश्चयेन त्वां, नेष्यामः सूरिसन्निधौ ॥ १४७ ॥ एवमुक्त्वा गताः श्राद्धा, द्वितीयेऽह्नि समागताः । आगच्छतु भवानद्य, व्याख्यानश्रवणाय च ॥१४८॥ श्रेष्ठ्युवाच नृपेणाहं, शीघ्रमाकारितोऽस्मि भोः ! । तेनाहं किं करोम्यत्र, गच्छामि राजमन्दिरम् ॥ १४९ ॥ तृतीयेह्नि पुनः श्राद्धा, आगताः श्रेष्ठि सद्मनि । तदा श्रेष्ठ्याह भोः श्राद्धाः !, प्राघूर्णकाः समागताः ॥ १५० ॥ एवमष्टदिनं यावत्, श्रेष्ठी तु श्रावकान् सदा । अलीकमुत्तरं दत्त्वा, सुतानेवं जगाद सः ॥ १५१ ॥ श्रूयतां वाक्यमस्माक–मागता अत्र सूरयः । व्याख्यानेऽहं गमिष्यामि, लोकानुरोधतः प्रगे ॥ १५२ ॥ श्राद्धा मां कथयिष्यन्ति, चातुर्मास्यकृते गुरोः । टीप्पन्यां यच्छ रुप्याणि, पंचसप्तशतानि वा ॥ १५३ ॥ तस्मात् तत्र गते पश्चात्, पत्रकं त्वरितञ्च भोः ! । प्रेषितव्यं स्वभृत्येन, राजकारणहेतुकम् ॥ १५४ ॥ नन्दद्दिने पुनः श्राद्धाः, श्रेष्ठीनमेयरुस्तदा । उत्तरीयञ्च वस्त्रं स्व-मादाय गतवान् मुधा ॥ १५५ ॥ अल्पकालेन दासेरः, गृहीत्वा पत्रकं तदा । समागादिभ्यपार्श्वे सः, दत्तवान् पत्रकं करे ॥ १५६ ॥ गृहीत्वा पत्रकं श्रेष्ठो, वाचयित्वा तदा च सः । बभाषे श्रावकान् श्रेष्ठी, अन्तरायोदयः खलु ॥ १५७ ॥ नत्वा सूरिं तदा श्रेष्ठी, आगतश्च निजे गृहे । सूरिरुवाच भोः श्राद्धाः !, नोपकारो भविष्यति ॥१५८॥ जगदुः श्रावकाः स्वामिन्, धनी धर्म पराङ्मुखः । एनं विना हि संघस्य, कार्यं किमपि नो भवेत् ॥ १५९ ॥ सूरिरुवाच भोः श्राद्धाः !, लाभोऽप्यत्र न दृश्यते । तेन प्रगे विहारञ्च, कारिष्यामि सुखेन भोः ॥ १६० ॥ उवाच मानचन्द्रोऽथ, विज्ञप्तिं शृणु मे प्रभो ! । रत्नपालं महेभ्यं तु, बोधयामि तवाज्ञया ॥ १६१ ॥ प्राह सूरिस्तु भोश्चन्द्र !, सुष्ठुकृतं भवेत्तदा । तं बोधय सुखेन त्वं, महालाभो

भविष्यति ॥ १६२ ॥ चन्द्रो जगौ भवान् कश्चित्, कालं तिष्ठतु अत्र वै । सूरिः प्राह निवत्स्यामि, कार्यं त्वं चिन्तितं कुरु ॥१६३॥ श्रेष्ठिव्यतिकरं ज्ञात्वा, चन्द्रः प्रगे गतः पणे । स्थितस्तत्र स एकान्ते, व्यवसायं तु पश्यति ॥ १६४ ॥ समये वाहनारुढो, श्रेष्ठी हट्टे समागमत् । उत्तीर्य वाहनाच्छ्रेष्ठी, योग्यस्थाने समासितः ॥ १६५ ॥ मानचन्द्रं तदा दृष्ट्वा, चित्ते चिन्तितवानिदम् । निष्क्रियोऽसौ दरिद्रो हि, बम्भ्रमन् नगरे सदा ॥ १६६ ॥ याचनार्थं तु मे हट्टे, समागत्य समाश्रितः । नाहं किञ्चित् ददाम्यस्मै, तिष्ठतु सुखपूर्वकम् ॥ १६७ ॥ (युग्मं) भाषायां–" पपासुं परचो नहिं० " इत्यादि । महान्तं व्यवसायञ्च, करोति स्म महोद्यमैः । रुप्यसुवर्णकार्पासः, हुण्डिकान्नादिकं तदा ॥१६८॥ एवं मध्याह्नकालेऽथ, पुनर्याने समागते । समाप्य सर्वकार्याणि, तस्मिन्नारुढवांस्तदा ॥ १६९ ॥ भोजनार्थं गतः श्रेष्ठी, उद्यानस्थे निजे गृहे । नानाविधानि भोज्यानि, सुखेन भुक्त्ववानसौ ॥१७०॥ पुनः काले समायातं, यानमारुह्य सत्वरम् । मुदागात् स्वापणं श्रेष्ठी, व्यापारमकरोत्तदा ॥१७१॥ पुनर्दृष्ट्वा च चन्द्रं सः, चित्ते चिन्तितवानिदम् । याचकस्तु अयं नास्ति, नो तिष्ठेत्मार्गणश्चिरम् ॥ १७२ ॥ याचितमपि नो किञ्चित्, संभवेन्नहि याचकः । गृहे गमनकाले च, प्रक्ष्याम्येनं यथातथम् ॥ १७३ ॥ प्रदोषसमये जाते, पुनर्याने समागते । हट्टादुत्तिष्ठवान् श्रेष्ठी, चन्द्रपार्श्वे समागमत् ॥ १७४ ॥ पृच्छति स्म किमर्थं त्व-मुपविष्टोसि सांप्रतम् । क्व वास्तव्योसि किन्नाम, तत् सर्वमभिधीयताम् ॥ १७५ ॥ उत्थितोसि भवानेव-मासि नोस्मि अहं पुनः । कथं मिथो भवेद्वार्ता, तस्मादत्रोपविश्यताम् ॥ १७६ ॥ श्रोतुकामस्तदा श्रेष्ठी, उपाविशत्तदन्तिके । ततश्चन्द्रो जगादैवं, मद्वार्ता श्रूयतामियम् ॥१७७॥ रत्नपुर्यां महेभ्योऽथ, नाम्ना च धनदोऽवसत् । लक्षाधिपस्तु स श्रेष्ठी, प्रसिद्धो नगरे महान् ॥१७८॥ वृद्धे वयसि पुत्रोऽभुत्, श्रेष्ठिचित्तातिहर्षकृत् । महोत्सवेन तस्याह्वं, मानचन्द्रं व्यधाद् मुदा ॥१७८॥ द्वादशवार्षिके जाते, तस्य लग्नमकारयत् । श्रेष्ठी धनव्ययं कृत्वा, आनयच्च स्नुषां गृहे ॥१८०॥ अल्पकालेन स श्रेष्ठी, पञ्चत्वं प्राप्तवान् तदा । प्रश्चात् मे जननी साऽपि, दीर्घनिद्रां समासदत् ॥१८१॥ नियोगिनस्तदा हस्ते, व्यवसायो गतः खलु । अहं कश्चिन्न जानामि, व्यापरविषयं दात ॥१८२॥ सप्ताष्टकसमे जाते, नष्टा लक्ष्मी च मे गृहात् । गते धने गृहात् श्रेष्ठिन्, कस्य चित्तं न मुह्यति ॥१८३॥ ऋणादहं

महादुःखी, विक्रितवान् गृहादिकम् । भाटकेन गृहं लात्वा, दरिद्रनायकोऽवसम् ॥१८४॥ भृत्यकार्याणि कृत्वाहं, करोम्युदरपूरणम् । महाकष्टेन कालो मे, गच्छति स्म तया सह ॥१८५॥ भार्या प्राह सदा मां तु, सुखं दृष्टं न ते गृहे । भोजनसमये साऽथ, वदत्येवं पुनःपुनः ॥१८६॥ एकदाऽऽवेशयुक्तेन, मया प्रोचे निजाप्रिया । दर्शय सुखसद्भत्व-मानयामि सुखं ततः ॥१८५॥ तच्छ्रुत्वा वनिता प्राह, गम्यतां नगराद् ब्रहिः । श्मशाने चण्डिकादेव्याः, सम्मुखे कुरु अष्टमम् ॥१८८॥ कृत्वा तिष्ठ ततो देवी, प्रत्यक्षं सा भविष्यति । वरं ब्रूहीति सा देवी, यदा त्वां कथयिष्यति ॥१८९॥ (युग्मं) तदा सुखं तु याचेथाः, येन दुःखं गमिष्यति । निशम्य वचनं तस्याः, विधाय हृदि निश्चयम् ॥१९०॥ श्रेष्ठिन्नहं गतस्तत्र, कृत्वाऽष्टमतपो मुदा । योजयित्वा च द्वौ हस्तौ, चण्डिकासम्मुखे स्थितः ॥१९१॥ (युग्मं) तृतीयायां निशायां सा, नेपथ्यादिविभूषिता । चण्डिका तपसाऽऽकृष्टा, प्रत्यक्षं साऽभवन्मम ॥१९२॥ देवी प्राहेति हे चन्द्र !, वरं याचस्व स्वेच्छाया । प्रसन्नाऽहं तपश्शक्त्या, प्रयच्छामि तवेप्सितम् ॥१९३॥ भो मातः ! मे सुख देहि, एवं प्रार्थितवानहम् । देव्याह वद भोश्चन्द्र !, यच्छामि कीदृशं सुखम् ॥१९४॥ कथितञ्च मया देवि !, पृच्छाम्यहं निजां प्रियाम् । तदर्थं समयं देहि, कृपां कृत्वा ममोपरि ॥१९५॥ मासद्वयं च देव्याह, तुभ्यं ददाम्यहं मुदा । तस्योपरि न दास्यामि, अवेहि निश्चयेन भोः ! ॥१९६॥ देवीगिरं समाकर्ण्य, आगतोऽहं गृहे तदा । भार्यायै कथयामास, देवीवाक्यं हि मूलतः ॥१९७॥ ग्रामेऽत्र सा जगौ तावत्, सुखी धनप्रियाभिधः । तुद्वत् सुखं तु देव्यग्रे, याचस्व परया मुदा ॥१९८॥ चिन्तितं तु मया श्रेष्ठीन्, स्त्रीवाक्येन करोमि किम् ? । श्रेष्ठिनमथवा पृष्ट्वा, निश्चयं कारवाणि किम् ॥१९९॥ गतोहं श्रेष्ठिनः पार्श्वे, पृष्टवांश्च तकं तदा । कीदृशं ते सुखं श्रेष्ठिन् !, वद त्वं मत्पुरो मुदा ॥२००॥ श्रेष्ठ्याह हेतुना केन, पृच्छतीदं भवान् मम । जातो व्यतिकरः सर्वः, प्रोक्तः श्रेष्ठिपुरो मया ॥२०१। श्रेष्ठी जगाद हे चन्द्र !, नो मन्यस्व सुखी इति । मत्सदृशं सुखं त्वं तु, मा याचस्व कदाऽपि हि ॥२०२॥ दुष्पुत्रैर्दुःखितोऽहं तु, न मे सुखं कदाचन । तेन शान्तिपुरे त्वं भो, नलश्रेष्ठ्यान्तिके व्रज ॥२०३॥ नलान्तिके गतोऽहं तु, पृष्टः सुखाय सो मया । अवादीन्मे सुखं नास्ति, महद् दुःखं निजे हृदि ॥२०४॥ मद्गृहे वनिते द्वे च, श्वासमात्रसुखं न हि । द्रव्यभृते गृहे

जाते, पुत्रपुत्र्यादिकं नहि ॥ २०५ ॥ अहर्निशं तु चिन्तायां, मे मनो बहु मुह्यति । सन्ततिवर्जिते पत्न्यौ, कुरुतः कलहं सदा ॥२०६॥ गच्छ लक्ष्मीपुरे त्वं तु, लाभचन्द्राभिधान्तिके । श्रेष्ठिनं तत्र गत्वा च, सुखं पृच्छतु लीलया ॥ २०७ ॥ लाभः प्राहागतं चन्द्रं, नाहं सुखी कदाचन । रक्षितं बहुलोकानां, द्रविणं तु गृहे मया ॥२०८॥ धनं दत्तं तु लोकानां, व्याजाशया मया मुदा । विद्यते न गृहे किञ्चित्, तेन चिन्तातिवर्तते, ॥२०९॥ भोजनं न मुखे याति, निद्रा दूरे गतास्ति मे । पुत्रादिका न मन्यन्ते, नास्ति सुखलवो मम ॥२१०॥ मादृशं तु सुखं चन्द्र !, मा याचस्व कदाचन । गच्छान्यत्र पुरे कश्चित्, पृच्छतु सुखिनं भवान् ॥२११॥ बहूनां धनिनां वृत्तं, ज्ञातमस्ति मया खलु । नैकोऽपि सुखभाग् ज्ञातः, ततस्त्वां प्रष्टुमागतः ॥ २११ ॥ वदत्वं स्वसुखं श्रेष्ठिन्, येन स्यां सफलश्रमः । मासद्वये तु युग्मं हि, न्यूनं दिनञ्च वर्तते ॥२१३॥ गते तत् समये श्रेष्ठिन् !, देवी दास्यति नो सुखम् । विलम्बं नो सहे यस्मात्, ततः शिघ्रं कृपां कुरु ॥२१४॥ श्रुत्वा श्रेष्ठी प्रमोदेन, चिन्तयामासिवानिदम् । आद्योऽहं सुखिनां मध्ये, न कोऽपि मादृशो जनः ॥२१५॥ चन्द्रं याने समारोप्य, जगौ श्रेष्ठी मुदा तदा । दर्शयामि सुखं मे स्वं, कीदृशोऽहं महासुखी ॥२१६॥ उद्‌र्ध्वी कृत्य निजं हस्तं, गृहादिकमदर्शयत् । सर्वमेतन् ममैवास्ति, पुरेऽन्यदपि वर्तते, ॥२१७॥ एवं वार्तां मिथः कुर्वन्, प्राप श्रेष्ठी गृहं मुदा । तस्य वृक्षान् समीपस्थान्, दर्शयित्वा च सोऽवदत् ॥२१८॥ प्रथमां भूमिकां पश्य, सन्त्यत्र वाहनादयः । आरक्षका द्वितीयायां, शस्त्रेण सज्जिताः सदा ॥ २१९ ॥ दासीदासास्तृतीयायां, ममाज्ञाधारिणो मुदा । चतुर्थ्यां भोजनार्थं च, वसन्ति भक्तकारकाः ॥२२०॥ पञ्चम्यां भूमिकायाञ्च, प्राघूर्णकाः समागताः । सुखपूर्वं च तिष्ठन्ति, ताविषे त्रिदशा इव ॥२२१॥ षष्ठ्यां भूमौ सुताः सर्वे, तिष्ठन्ति सुखशालिनः । ममाज्ञां तु शिरोधार्यां, मन्यन्ते, गुरुवागिव ॥२२२॥ सप्तम्यां भूमिकायाञ्च, तोरणादीनि पश्य भोः ! । एषां कान्तिसमुहैश्च, प्रकाशो निशि वर्तते ॥ २२३ ॥ सुवर्णमयपल्यंक-चीनांशुकमसूरकान् । देवानां दुर्लभान् सर्वान्, पश्य चन्द्र ! मनोहरान् ॥२२४॥ ऋणं कस्यापि मे नास्ति, सुखं गीर्वाणसन्निभम् । तेन त्वमपि याचस्व, देव्यग्रे मादृशं सुखम् ॥२२५॥ श्रुत्वैतां श्रेष्ठिनो वार्तां, दृष्ट्वाऽऽवासादिकं तदा । विलक्षवदनश्चन्द्रः, मौनेन स्थितवान् खलु ॥२२६॥

रत्नपालो जगौ चन्द्रं, औदासीन्यं कथं तव। सर्वे न्यषेधयन् त्वाञ्च, अहं सम्मतिदोऽभवम् ॥२२६॥ धूनयन्नुत्तमाङ्गं सो, जगाद श्रेष्ठिनं प्रति। एतत् सर्वं मुधा ज्ञेयं, स्वप्नो हि खलु भो वणिक् ॥२२८॥ स्वप्नो मम सदा श्रेष्ठः, श्रेष्ठिन् निरर्थकस्तव। अस्मिन् स्वप्ने न मुह्येस्त्वं, निजे हृदि विचारय ॥२२९॥ रत्नपालो जगौ चन्द्र !, मृषा वदति किं भवान्। अहं जाग्रत् सदैवस्मि, त्वं तन्द्रायां च वर्तसे ॥२३०॥ चन्द्रो बभाण हे श्रेष्ठिन् !, सत्यं वदामि ते पुरः। जानीहि त्वमिदं सर्वं, स्वप्नं तु निश्चयेन भोः ॥२३१॥ चन्द्रो जगाद हे श्रेष्ठिन् !, शृणु स्वप्न कथां मम। निशिदृष्टो मया स्वप्नः, सर्वथानन्ददायकः ॥२३२॥ मत्पार्श्वे सन्ति कोट्यश्च, द्रविणानां तु षोडश। षोडशात्मजकन्याश्च, षोडशभूमिके स्थितः ॥२३४॥ दुःखस्य नो लवस्तत्र, सुखेन यान्ति वासराः। उन्मीलिते तु नेत्रे मे, नष्टस्वप्नोऽभवत्तदा ॥२३५॥ गतं सर्वं सुखं श्रेष्ठिन्, पश्चातापोऽभवन्महान्। एवं ते मिलिते नेत्रे, सर्वं नष्टं भविष्यति ॥२३६॥ मम स्वप्नस्त्वतिश्रेष्ठः, तव स्वप्नो निरर्थकः। तत् सुखं संस्मराम्यद्य, त्वया नैव स्मरिष्यते ॥ २३७ ॥ स्मृत्वाहं तत् सुखं श्रेष्ठिन्, सुखं वेद्मि पुनःपुनः। तत्र यादृश आनन्दः, तं कथं कथयाम्यहम् ॥ २६८ ॥ श्रेष्ठिन्नयं तव स्वनो, नो भावि चित्तमोदकृत्। यदि त्वं मन्यसे सत्यं, तदा वद गतं भवम् ॥२३९॥ द्वौ स्वप्नावेव हे श्रेष्ठिन् !, समानौ ते ममापि च। तेनाहं कथयामि त्वां, विचारय निजे हृदि ॥ २४० ॥ श्रेष्ठि प्रोवाव हे चन्द्र !, किं जल्पसि च मूर्खवत्। प्रत्यक्षं सर्वकार्याणि, करोम्यहं मुदा सदा ॥२४१॥ जनः पश्यति सर्वाणि, प्रत्यक्षं निजचक्षुषा। किं वदसि भवानेवं, मन्येहं ग्रथिलोऽसि किम् ? ॥२४२॥ नाहं मूर्खश्च हे श्रेष्ठिन् !, विचार्यतां निजे हृदि। सत्यमेतद् यदा सर्वं, पूर्वजन्म तदा वद ॥२४३॥ पूर्वजन्म यदि त्वं तु, नो मन्यसे तदा शृणु। त्वमेव नगरश्रेष्ठी, लक्ष्मीपतिस्त्वमेव हि ॥२४४॥ निमित्तं तत्र भाग्यं हि, न स्यात् किमपि तद्विना। तस्मान्मन्यस्व भाग्यं भोः, पुनर्बाढं विचारय ॥२४५॥ विचारयति स श्रेष्ठी, पूर्वं धर्मो मया कृतः। तेनाऽहमीदृशो जातः, भावि किं मे भविष्यति ॥२४६॥ चिन्तयित्वा बभाषे तं, हाहा ! जन्म मुधा गतं। दर्शय धर्ममार्गञ्च, त्वमेव मे गुरुस्ततः ॥२४७॥ चन्द्रः प्रोवाच हे श्रेष्ठीन् !, आचार्याः सन्त्युपाश्रये। मया सार्धञ्च एहि त्वं, वन्दस्व गुरु पत्कजौ ॥२४८॥ द्वितीयेऽह्नि प्रगे श्रेष्ठी, सचन्द्रः सूरिस-

न्निधौ । समागादतिहर्षेण, वन्दते चरणौ गुरोः ॥२४९॥ श्रेष्ठी प्रोवाच हे स्वामिन्!, ममागः क्षम्यतान्त्वया । सूरिर्भो ! धर्मलाभस्ते, इत्याशिषमदान्मुदा ॥२५०॥ पश्चाद्धर्मोपदेशं तु, दत्तवान् श्रेष्ठिनं प्रति । श्रुत्वा धर्मं तदा श्रेष्ठी, सुव्रतान्यग्रहीन् मुदा ॥२५१॥ मानचन्द्रस्य दीक्षायाः, महोत्सवं व्यधाच्च सः । लक्षं द्रव्यं व्ययित्वा च, चातुर्मास्यमकारयत् ॥२५२॥ द्वादशानि च सर्वाणि, सम्यक्त्वसहितान्यपि । व्रतानि पालयित्वा च, शुद्धभावेन सर्वदा ॥२५३॥ अन्तिमाराधनां कृत्वा, स्वायुषं स समाप्य च । दिवं गत्वा सुखं भुक्त्वा, च्युत्वा मुक्तिं गमिष्यति ॥२५४॥ (युग्मं) संयमाराधनां कृत्वा, तपोभिर्विविधैः सदा । मष्टकर्मा स चन्द्रर्षिः, सिद्धिसौख्यं हि प्राप्तवान् ॥२५५॥ इति श्रीरत्नपालस्य, चरित्रं रससंयुतम् । श्रुत्वा श्रुत्यां च भो भव्याः!, भूयासुः सादराः सदा ॥२५६॥ सुधर्मस्वामिपट्टे यः, परिपाट्या तपागणे । बहुश्रुतेषु विख्यातः, वादिमदविनाशकः ॥ २५७ ॥ आगमोद्धारकर्ताश्च, भूपालप्रतिबोधकः । पट्टो जीवदयाकारी, येन प्राप्तो नृपालतः ॥२५८॥ जिनागमस्य रक्षायै, स्वोपदेशेन कारिते । बन्दिरे सूर्यपूर्नाम्नि, पादलिप्ताभिधे पुरे ॥२५९॥ ताम्रपत्रशिलोत्कीर्णे, आगममन्दिरे क्रमात् । शासने बहुकार्याणि, कृतानि निज जन्मनि ॥२६०॥ प्रशमादिगुणोपेतः, बद्धलक्षः सदागमे । सूरिगणेऽग्रगण्योभूत्, सूरिरानन्दसागरः ॥२६१॥ तच्छिष्यः शान्तमूर्तिश्च, पाठकपदधारकः । ज्ञानक्रियासु दक्षो यः, श्रीक्षमासागरो गुरुः ॥२६२॥ तत् पादकजभृङ्गेन, शिशुत्रैलोक्यवार्धिना । पुण्यालीति शुभे ग्रामे, देशे च लघुवाग्वरे ॥२६३॥ प्रासाददण्डकार्यार्थे, स्थितिर्यत्र कृता शुभा । आदिजिनप्रसादेन, लिख्यमाना कथा हि या ॥२६४॥ वर्तमाने तपागच्छे, माणिक्यसागरस्य च । गच्छनेतृमहासूरेः, साम्राज्ये गुणसंजुषः ॥२६५॥ रुद्रव्योमद्विवर्षे च, पक्षेऽसिते च फाल्गुने । दशम्यां गुरुघस्त्रे सा, समाप्ताऽभूत् सुखावहा ॥२६६॥ एतस्या रत्नपालस्य, कथाया अतिमोदतः । कृता शुद्धिर्यथाशक्तिः, प्रबोधसागरेण हि ॥२६७॥ तुलाकृष्णेतिनामा यः, पण्डितेषु महोत्तमः । दृष्टीपातः कृतस्तेन, अभयज्ञानमन्दिरे ॥ २६८ ॥ नास्ति मे काव्यशक्तिस्तु, नो ज्ञानं शब्दयोजनम् । तस्माद्विद्वज्जनाः सर्वे, क्षम्यन्तु कृपया मम ॥ २६९ ॥

## ॥ इतिश्रीरत्नपालचरित्रम् ॥